श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसदाशिवाभिनवनृसिंहभारती कृतं

# ॥ श्री पद्मनाभस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री पद्मनाभस्तोत्रम् ॥

पद्मनाभ करुणामृतराशे
    सद्महेतुलवशून्यकृपायाः।
छद्महारितमहाबलिसम्पद् -
    विद्म एव तव वीर्यमनन्तम् ॥ 1 ॥

नाभ्याः सरस्त्वेन हि वर्णनं तु
    सत्यं तदा स्यात्किल पद्मनाभ।
यदा त्वदीयं विषयीकरोति
    नाभिं न चेद्याति कथं प्रमात्वम् ॥ 2 ॥

नाभीपद्मे पुत्रं
    वक्षसि कान्तां च सन्दधत्तान्तः।
स्वपिषि सदा किं विष्णो
    नम्रायास्मै द्रुतं ब्रूहि ॥ 3 ॥

पापाब्धौ बडवानलस्य हि शिखा जाड्यान्धकारे रविः
    भाग्याब्धौ शरदिन्दुपङ्क्तिरमला त्वन्नामसङ्कीर्तनम्।
भक्तानां परिपोषणे च जननी स्वात्मावबोधे पिता
    कस्तस्माद्विमुखो भवेद्भुवि नरो नो चेन्महापापभाक् ॥ 4 ॥

क्षीराम्भोनिधिराजमानफणिराण्मध्ये शयाना सदा
    लक्ष्मीपाणिपयोजमर्दितपदा कारुण्यवारान्निधिः।
कुर्वाणा मधुना च कैटभयुजा युद्धं च दोर्भ्यां मुहुः
    मुद्रा काचन मुक्तिदानकुशला निद्राति जागर्ति वा ॥ 5 ॥

पद्मनाभ तव पादसरोजा -
    सक्तचित्तमवनीपतिमेनम्।
पाहि साश्रितसबन्धुसविट्ठल् -
    लोकमादरभरेण सराष्ट्रम्॥ 6॥

सामोदं प्रदिशन्तु वञ्चिकुलभूमूलर्क्षराजाय वाग् -
    देवीचन्द्रकलाधरेभवदनाः कारुण्यवाराशयः।
दीर्घायुर्दृढगात्रतामलयशांस्याचन्द्रतिग्मांशुभं
    धर्माध्वन्यधिकां प्रवृत्तिमचलामच्छिन्नसत्सन्ततिम्॥ 7॥

पायासुर्जगदम्बकेन्दुविलसच्छीर्षेभवक्त्राः सदा
    राज्ञ्यौ केरलदेशभाग्यलतिके कारुण्ययुग्भिर्मुदा।
दृग्भिः पादविनम्रसौख्यविततेः सम्पादिकाभिर्जवाद् -
    दत्त्वा सन्ततिमाशु सद्गुणयुतामारोग्यदीर्घायुषी॥ 8॥

मोचितः किं गजाधीश पद्मनाभेन सत्वरम्।
दृढभावनया तस्य पद्मनाभोऽभवद्गजेट्॥ 9॥

श्रीभूमिपाणिसरसीरुहसेविताङ्घ्रे
    श्रीवत्सकौस्तुभधर प्रणतार्तिहारिन्।
श्रीकण्ठमित्र दिननाथसुधांशुनेत्र
    श्रीपद्मनाभ मम देहि पदावलम्बम्॥ 10॥

नागेन्द्रभोगशयन प्रणतालिवाञ्छा -
    सम्पूरणामरतरो विधियोनिनाभे।
नाकाधिपादिपरिपूजितपादपद्म
    श्रीपद्मनाभ मम देहि करावलम्बम्॥ 11॥

कमलाकरपद्मपूजितं
    करुणादुग्धपयोधिमध्यगम्।
भुजगाधिपभोगशायिनं
    कलये कञ्चन देवसत्तमम्॥ 12॥

॥ श्री पद्मनाभस्तोत्रं समाप्तम्॥